M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 530

Title: Vaisheshika Sutras

530

वैशेषिक सूत्र by कणाद

~~Incomplete~~

	Vaisheshika Sutras	Title
	Kaṇāda	Author
		Editor
		Year, Vols.
		Publisher
530	~~Begins abruptly~~	Remarks

नंपदार्था २

वैशेषि कसूत्रं श्रीगणेशाय नमः॥ अथातो धर्मं व्याख्यास्यामः॥१॥ यतोभ्युदयनिःश्रेयससिद्धिः स धर्मः॥२॥ तद्वचनादाम्नाय
प्रामाण्यं॥३॥ धर्मविशेषप्रसूताद्द्रव्यगुणकर्मसामान्यविशेषसमवायानां साधर्म्यवैधर्म्याभ्यां तत्वज्ञा
नान्निःश्रेयसं॥४॥ पृथिव्यापस्तेजोवायुराकाशं कालो दिगात्मा मन इति द्रव्याणि॥५॥ रूपरसगंधस्पर्शाः
संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः॥६॥
उत्क्षेपणमपक्षेपणमाकुंचनं प्रसारणं गमनमिति कर्माणि॥७॥ सदनित्यं द्रव्यवत्कार्यं कारणं सामान्य १
विशेषवदिति द्रव्यगुणकर्मणामविशेषः॥८॥ द्रव्यगुणयोः सजातीयारंभकत्वं साधर्म्यं॥९॥ द्रव्याणि
द्रव्यांतरमारभंते गुणाश्च गुणांतरं॥१०॥ कर्म कर्मसाध्यं न विद्यते॥११॥ न द्रव्यं कार्यं कारणं च वधति॥१२॥
उभयथा गुणाः॥१३॥ कार्यविरोधि कर्म॥१४॥ क्रियागुणवत्समवायिकारणमिति द्रव्यलक्षणं॥१५॥ द्रव्याश्र
य्यगुणवान् संयोगविभागेष्वकारणमनपेक्षित इति गुणलक्षणं॥१६॥ एकद्रव्यमगुणं संयोगविभागेष्व

कु

का० कारणमनपेक्ष इति कर्मलक्षणं॥१७॥ द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यं॥१८॥ उभयथा गुणाः॥१९॥
संयोगविभागवेगानां कर्म॥२०॥ न द्रव्याणां॥२१॥ व्यतिरेकात्॥२२॥ द्रव्याणां द्रव्यं कार्यं सामान्यं॥२३॥
गुणवैधर्म्यान्न कर्मणां॥२४॥ द्वित्वप्रभृतयः संख्याः पृथक्त्वसंयोगविभागाः॥२५॥ असमवायात्सा
र्म मान्यकार्यं कर्म न विद्यते॥२६॥ संयोगानां द्रव्यं॥२७॥ रूपाणां रूपं॥२८॥ गुरुत्वप्रयत्नसंयोगानामुत्क्षे
पणं॥२९॥ संयोगविभागाश्च कर्मणां॥३०॥ कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तं॥३१॥
इति कणादसूत्रे प्रथमस्य प्रथममाह्निकं॥ ॥कारणाभावात्कार्याभावः॥१॥ न तु कार्याभावात्का
रणाभावः॥२॥ सामान्यं विशेष इति बुद्ध्यपेक्षं॥३॥ भावोनुवृत्तेरेव हेतुत्वात्सामान्यमेव॥४॥ द्रव्यत्वं गु
च णत्वं कर्मत्वं च सामान्यानि विशेषाश्च॥५॥ अन्यत्रांत्येभ्यो विशेषेभ्यः॥६॥ सदिति यतो द्रव्यगुणकर्मसु सा
सत्ता॥७॥ द्रव्यगुणकर्मभ्योर्थांतरं सत्ता॥८॥ गुणकर्मसु भावान्न कर्म न गुणः॥९॥ सामान्यविशेषा

भावेन च ॥१०॥ अनेकद्रव्यवत्वेन द्रव्यत्वमुक्तं ॥११॥ सामान्यविशेषाभावेन च ॥१२॥ तथा गुणेषु
भावाद्गुणत्वमुक्तं ॥१३॥ सामान्यविशेषाभावेन च ॥१४॥ कर्मसु भावात्कर्मत्वमुक्तं ॥१५॥ सामान्य
विशेषाभावेन च ॥१६॥ सदिति लिंगाविशेषाद्विशेषलिंगाभावाच्चैको भावः ॥१७॥ ॥इति श्रीक
णादसूत्रे द्वितीयमाह्निकं ॥ प्रथमोध्यायः ॥ ॥रूपरसगंधस्पर्शवती पृथिवी ॥१॥ शुक्लमधुरशीता
एवगंधरसस्पर्शाः ॥२॥ तेजो रूपस्पर्शवत् ॥३॥ स्पर्शवान्वायुः ॥४॥ त आकाशे न विद्यंते ॥५॥ सर्पिर्जि
तुमधूच्छिष्टानामग्निसंयोगाद्द्रवता द्भिः सामान्यं ॥६॥ त्रपुसीसलोहरजतसुवर्णानामग्निसंयो
गाद्द्रवताद्भिः सामान्यं ॥७॥ विषाणी ककुद्मान्प्रांते वालधिः सास्नावानिति गोत्वे दृष्टं लिंगं ॥८॥ स्प
र्शश्च ॥९॥ न च दृष्टानां स्पर्श इत्यदृष्टलिंगो वायुः ॥१०॥ अद्रव्यत्वेन द्रव्यं ॥११॥ क्रियावत्वाद्गुणवत्वाच्च ॥१२॥
 अद्रव्यत्वेन नित्यत्वमुक्तं ॥१३॥ वायोर्वायुसंमूर्छनं नानात्वे लिंगं ॥१४॥ वायुसंनिकर्षे प्रत्यक्षाभावा

 दृष्टं लिंगं न विद्यते ॥१५॥ सामान्यतो दृष्टाच्चाविशेषः ॥१६॥ तस्मादागमिकं ॥१७॥ संज्ञाकर्म त्वस्मद्विशि
ष्टानां लिंगं ॥१८॥ प्रत्यक्षप्रवृत्तत्वात्संज्ञाकर्मणः ॥१९॥ निष्क्रमणं प्रवेशनमित्याकाशस्य लिंगं ॥२०॥
तदलिंगमेकद्रव्यत्वात्कर्मणः ॥२१॥ कारणांतरानुक्लृप्तिवैधर्म्याच्च ॥२२॥ संयोगादभावः कर्मणः ॥२३॥
कारणगुणपूर्वः कार्यगुणो दृष्टः ॥२४॥ कार्यांतराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः ॥२५॥ परत्र
समवायात्प्रत्यक्षत्वाच्च नात्मगुणो न मनोगुणः ॥२६॥ परिशेषाल्लिंगमाकाशस्य ॥२७॥ द्रव्यत्वनि
त्यत्वे वायुना व्याख्याते ॥२८॥ तत्वं भावेन ॥२९॥ शब्दलिंगाविशेषाद्विशेषलिंगाभावाच्च ॥३०॥ तदनुवि
धानादेकपृथक्त्वं चेति ॥३१॥ ॥इति कणादसूत्रे द्वितीयस्य प्रथममाह्निकं ॥ ॥पुष्पवस्त्रयोः सति
संनिकर्षे गुणांतराप्रादुर्भावो वस्त्रे गंधाभावलिंगं ॥१॥ व्यवस्थितः पृथिव्यां गंधः ॥२॥ एतेनोष्णता
व्याख्याता ॥३॥ तेजस उष्णता ॥४॥ अप्सु शीतता ॥५॥ अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिंगानि ॥६॥

कणादसूत्रं द्रव्यत्वनित्यत्वे वायुना व्याख्याते।७।तत्त्वं भावेन।८।नित्येष्वभावादनित्येषु भावात्कारणे कालाख्येति॥९॥
तत इदमिति यतस्तद्दिश्यं लिंगं॥१०॥द्रव्यत्वनित्यत्वे वायुना व्याख्याते।११।तत्त्वं भावेन।१२।कार्यविशे
षेण नानात्वं।१३।आदित्यसंयोगाद्भूतपूर्वाद्भविष्यतो भूताच्च प्राची।१४॥तथा दक्षिणा प्रतीच्युदी
ची च।१५।एतेन दिगंतरालानि व्याख्यातानि।१६।सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश् ३
च संशयः।१७॥दृष्टं च दृष्टवत्॥१८॥यथादृष्टमयथादृष्टत्वाच्च।१९।विद्याविद्यातश्च संशयः॥२०॥
श्रोत्रग्रहणो योऽर्थः स शब्दः॥२१॥तुल्यजातीयेष्वर्थांतरभूतेषु विशेषस्योभयथा दृष्टत्वात्॥२२॥नापि
कर्माचाक्षुषत्वात्प्रत्ययस्य॥२३॥गुणस्य सतोपवर्गः कर्मभिः साधर्म्यं।२४॥सतो लिंगाभावात्॥२५॥
नित्यवैधर्म्यात्॥२६॥अनित्यश्चायं कारणतः॥२७॥न चासिद्धं विकारात्॥२८॥अभिव्यक्तौ दोषात्॥२९॥
संयोगाद्विभागाच्च शब्दनिष्पत्तिः॥३०॥लिंगाच्च नित्यः शब्दः॥३१॥द्वयोस्तु प्रवृत्त्योरभावात्॥३२॥प्रथमा

शब्दात्॥३३॥संप्रतिपत्तिभावाच्च।३४।संदिग्धः सति बहुत्वे॥३५॥संख्याभावः सामान्यतः॥३६॥ ॥
इति कणादसूत्रे द्वितीयाध्याये द्वितीयमाह्निकं॥ ॥द्वितीयोध्यायः॥ ॥प्रसिद्धा इंद्रियार्थाः॥१॥
इंद्रियार्थप्रसिद्धिरिंद्रियार्थेभ्योऽर्थांतरस्य हेतुः॥२॥सोऽनपदेशः॥३॥कारणाज्ञानात्।४।कार्येषु ज्ञा
नात्।५।अज्ञानाच्च।६।अन्यदेव हेतुरित्यनपदेशः॥७॥अर्थांतरं ह्यर्थांतरस्यानपदेशः॥८॥संयोगि स
मवाय्येकार्थसमवायि विरोधि च।९।कार्यं कार्यांतरस्य।१०।विरोध्यभूतं भूतस्य॥११॥भूतमभूतस्य॥१२॥
भूतो भूतस्य।१३।प्रसिद्धिपूर्वकत्वादपदेशस्य।१४।अप्रसिद्धोऽनपदेशोऽसन्संदिग्धश्चानपदेशः॥१५॥
यस्माद्विषाणी तस्मादश्वः।१६।यस्माद्विषाणी तस्माद्गौरिति चानेकांतिकस्योदाहरणं॥१७॥आ
त्मेंद्रियार्थसंनिकर्षाद्यन्निष्पद्यते तदन्यत्।१८।प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिंगं॥१९॥
इति कणादसूत्रे तृतीयस्याध्यायस्याद्यमाह्निकं॥ ॥आत्मेंद्रियसंनिकर्षे ज्ञानस्य भावोऽभावश्च म

कणादसू॰ मनसोलिंगं॥१॥तस्यद्रव्यत्वनित्यत्वेवायुनाव्याख्याते।२।प्रयत्नयौगपद्याज्ज्ञानायौगपद्याच्चैकं॥३॥
प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियांतरविकाराःसुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनोलिं
गानि।४।तस्यद्रव्यत्वनित्यत्वेवायुनाव्याख्याते।५।यज्ञदत्तइतिसंनिकर्षेप्रत्यक्षाभावाद्दृष्टंलिंगंनवि
द्यते।६।सामान्यतोदृष्टाच्चाविशेषः।७॥तस्मादागमिकः।८॥अहमितिशब्दस्यव्यतिरेकान्नागमि
कं।९।यदिदृष्टमन्वक्षमहंदेवदत्तोहंयज्ञदत्तइति।१०॥दृष्टआत्मनिलिंगेएकएवदृढत्वात्प्रत्यक्षव ४
त्प्रत्ययः॥११॥देवदत्तोगच्छतियज्ञदत्तोगच्छतीत्युपचारा[illegible]च्छरीरेप्रत्ययः॥१२॥संदिग्ध
स्तूपचारः॥१३॥अहमितिप्रत्यगात्मनिभावात्परत्राभावादर्थांतरप्रत्यक्षः॥१४॥देवदत्तोगच्छतीत्यु
पचारादभिमानाच्छरीरप्रत्यक्षोहंकारः॥१५।संदिग्धस्तूपचारः॥१६॥नतुशरीरविशेषाद्यज्ञदत्त
विष्णुमित्रयोर्ज्ञानविषयः॥१७॥अहमितिमुख्ययोग्याभ्यांशब्दवद्व्यतिरेकाव्यभिचाराद्विशेषसिद्धेर्ना

गमिकः॥१८॥सुखदुःखज्ञाननिष्पत्त्यविशेषादैकात्म्यं।१९।व्यवस्थातोनाना।२०॥शास्त्रसामर्थ्याच्च॥२१॥
इतिकणादसूत्रेतृतीयाध्यायस्यद्वितीयमाह्निकं॥ ॥तृतीयोध्यायः॥ ॥सदकारणवन्नित्यं॥१॥
तस्यकार्यंलिंगं।२।कारणभावात्कार्यभावः।३।अनित्यजातिविशेषतःप्रतिषेधभावः॥४॥अविद्या॥५॥
महत्यनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिः।६।सत्यपिद्रव्यत्वेमहत्त्वेरूपसंस्काराभावाद्वायोरनुपलब्धिः।७।
अनेकद्रव्यसमवायाद्रूपविशेषाच्चरूपोपलब्धिः।८।तेनरसगंधस्पर्शेषुज्ञानंव्याख्यातं।९॥
तस्याभावादव्यभिचारः।१०॥संख्याःपरिमाणानिपृथक्त्वंसंयोगविभागौपरत्वापरत्वेकर्मचरूपि
द्रव्यसमवायाच्चाक्षुषाणि॥११॥अरूपिष्वचाक्षुषाणि॥१२॥एतेनगुणत्वेभावेचसार्वेन्द्रियंज्ञानंव्याख्या
तं॥१३॥ ॥इतिकणादसूत्रेचतुर्थस्याध्यायस्यप्रथममाह्निकं॥ ॥तत्पुनःपृथिव्यादिकार्यद्रव्यंत्रिविधंशरीरेन्द्रि
यविषयसंज्ञकं।१।प्रत्यक्षाप्रत्यक्षाणांसंयोगस्याप्रत्यक्षत्वात्पंचात्मकंनविद्यते॥२॥गुणांतराप्रादुर्भा

काणाद· वाङ्मनत्रात्मकं ।३॥ अणुसंयोगस्त्वप्रसिद्धे मिथः पंचानां ।४। तत्र शरीरं द्विविधं योनिजमयोनिजं च ।५॥
अनियतदिग्देशपूर्वकत्वात् ।६॥ धर्मविशेषाच्च ॥७॥ समाख्याभावाच्च ।८॥ संज्ञाया आदित्वात् ।९॥
सन्त्ययोनिजाः ।१०॥ वेदलिंगाच्च ॥११॥ ॥इति काणादे चतुर्थस्य द्वितीयमाह्निकं॥ ॥चतुर्थोध्यायः॥
आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म ।१। तथा हस्तसंयोगान्मुसले कर्म ।२। अभिघातजे मुसलादौ क- ५
र्मणि व्यतिरेकादकारणं हस्तसंयोगः ।३। तथात्मसंयोगो हस्तकर्मणि ।४। अभिघातान्मुसलसंयो-
गाद्धस्ते कर्म ।५॥ आत्मकर्म हस्तसंयोगाच्च ।६। संयोगाभावाद्गुरुत्वात्पतनं ।७। नोदनाविशेषा-
भावान्नोर्ध्वं न तिर्यग्गमनं ।८॥ प्रयत्नविशेषान्नोदनविशेषो नोदनविशेषादुदसनविशेषः ।९॥
हस्तकर्मणा दारककर्म व्याख्यातं ।१०। तथा दग्धस्य विस्फोटने ।११। प्रयत्नाभावे प्रसुप्तस्य चलनं ।१२॥
तृणे कर्म वायुसंयोगात् ।१३॥ मणिगमनं सूच्यभिसर्पणमित्यदृष्टकारणकं ।१४॥ इषावयुगपत्संयो-

गविशेषाः कर्मान्यत्वे हेतुः ।१५॥ नोदनादाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरं च ॥१६॥
संस्काराभावे गुरुत्वात्पतनं ॥१७॥ ॥इति काणादे पंचमस्याद्यमाह्निकं॥ ॥नोदनाभिघातात्संयुक्त-
संयोगाच्च पृथिव्यां कर्म ॥१॥ तद्विशेषेणादृष्टकारितं ।२॥ अपां संयोगाभावे गुरुत्वात्पतनं ।३। द्रवत्वा-
त्यं त्स्यंदनं ।४। नाड्यो वायुसंयोगादारोहणं ।५। नोदनापीडनात्संयुक्तसंयोगाच्च ।६। वृक्षाभिसर्पणमि-
त्यदृष्टकारितं ।७। अपां संघातो विलयनं च तेजःसंयोगात् ।८। तत्रावस्फूर्जथुर्लिंगं ।९। वैदिकं च ।
अपां संयोगाद्विभागाच्च स्तनयित्नोः ॥१०॥ पृथिवीकर्मणा तेजःकर्म वायुकर्म च व्याख्यातं ॥११॥ अ-
ग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनमणूनां मनसश्चाद्यं कर्मादृष्टकारितं ।१२। हस्तकर्मणा मनसः कर्म
व्याख्यातं ॥१३॥ आत्मेन्द्रियमनोर्थसंनिकर्षात्सुखदुःखे ॥१४॥ तदनारंभ आत्मस्थे मनसि शरीर-
स्य दुःखाभावः संयोगः ॥१५॥ कायकर्मणात्मकर्म व्याख्यातं ।१६॥ अपसर्पणमशितपीतसं-

काणद॰ योगाः कार्यांतरसंयोगाश्चेत्यदृष्टकारितानि ॥१७॥ तदभावे संयोगाभावोऽप्रादुर्भावश्च मोक्षः ॥१८॥ द्रव्यगु
णकर्मनिष्पत्तिवैधर्म्याद्भावस्तमः ॥१९॥ तेजसो द्रव्यांतरेणावरणाच्च ॥२०॥ दिक्कालावाकाशं च क्रिया
वद्वैधर्म्यान्निष्क्रियाणि ॥२१॥ एतेन कर्माणि गुणाश्च व्याख्याताः ॥२२॥ निष्क्रियाणां समवायः कर्मभ्यो
निषिद्धः ॥२३॥ कारणं त्वसमवायिनो गुणाः ॥२४॥ गुणैर्दिग्व्याख्याता ॥२५॥ कारणेन कालः ॥२६॥ ॥इ
इति श्रीकाणादसूत्रे पंचमाध्याये द्वितीयमाह्निकं ॥ ॥पंचमाध्यायः॥ ॥बुद्धिपूर्वा वाक्यकृतिर्वेदे ॥१॥ ६
ब्राह्मणे संज्ञाकर्मसिद्धिलिंगं ॥२॥ बुद्धिपूर्वो ददातिः ॥३॥ तथा प्रतिग्रहः ॥४॥ आत्मांतरगुणानामात्मांतरे
कारणत्वात् ॥५॥ तद्दुष्टभोजने न विद्यते ॥६॥ दुष्टं हिंसायां ॥७॥ तस्य समभिव्याहारतो दोषः ॥८॥ तददुष्टे न वि
द्यते ॥९॥ पुनर्विशिष्टे प्रवृत्तिः ॥१०॥ समे हीने वा प्रवृत्तिः ॥११॥ एतेन हीनसमविशिष्टधार्मिकेभ्यः परस्वादा
नं व्याख्यातं ॥१२॥ यथोतरं धर्मोत्कर्षः ॥१३॥ तथा विरुद्धानां त्यागः ॥१४॥ हीने परे त्यागः ॥१५॥ समे आत्मत्या
य

गः परत्यागो वा ॥१६॥ विशिष्टे आत्मत्याग इति ॥ ॥इति काणादे षष्ठे प्रथममाह्निकं ॥ ॥दृष्टादृष्ट
प्रयोजनानां दृष्टाभावे प्रयोजनमभ्युदयाय ॥१॥ अभिषेचनोपवासब्रह्मचर्यगुरुकुलवासवानप्र
स्थयज्ञदानप्रोक्षणदिङ्नक्षत्रकालनियमाश्चादृष्टाय ॥२॥ चातुराश्रम्यमुपधा अनुपधाश्च ॥३॥ भाव
दोष उपधा अदोषोऽनुपधा ॥४॥ यदिष्टरूपरसगंधस्पर्शं प्रोक्षितमभ्युक्षितं च तच्छुचि ॥५॥ अशुचीति शु
चिप्रतिषेधः ॥६॥ अर्थांतरं च ॥७॥ अयतस्य शुचिभोजनादभ्युदयो न विद्यते नियमाभावाद्विद्यते वार्था
तरत्वाद्यमस्य ॥८॥ असति चाभावात् ॥९॥ सुखाद्रागः ॥१०॥ तन्मयत्वाच्च ॥११॥ अदृष्टाच्च ॥१२॥ जातिविशेषा
च्च ॥१३॥ इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्तिः ॥१४॥ तत्संयोगो विभागः ॥१५॥ आत्मकर्मसु मोक्षो व्याख्यातः ॥१६॥
इति काणादे षष्ठाध्याये द्वितीयमाह्निकं ॥ ॥षष्ठोऽध्यायः॥ उक्ता गुणाः ॥१॥ पृथिव्यादिरूपरसगंधस्पर्शा
द्रव्यानित्यत्वादनित्याः ॥२॥ एतेन नित्येषु नित्यत्वमुक्तं ॥३॥ अप्सु तेजसि वायौ च नित्या द्रव्यनित्यत्वात् ॥४॥

काणादं अनित्येष्वनित्या द्रव्यानित्यत्वात् ॥५॥ कारणगुणपूर्विकाः पृथिव्यांपाकजाः ॥६॥ एकद्रव्यत्वात् ॥७॥ अणो
र्महतश्चोपलब्ध्यनुपलब्धी नित्ये व्याख्याते ॥८॥ कारणबहुत्वाच्च ॥९॥ अतो विपरीतमणु ॥१०॥ अणुम
हदिति तस्मिन्विशेषभावाद्विशेषाभावाच्च ॥११॥ एककालत्वात् ॥१२॥ दृष्टांताच्च ॥१३॥ अणुमहतयोरणु
महत्वाभावः कर्मगुणैर्व्याख्यातः ॥१४॥ कर्मभिः कर्माणि गुणैश्च गुणा व्याख्याताः ॥१५॥ अणुत्वमह ७
त्वाभ्यां कर्मगुणाश्च व्याख्याताः ॥१६॥ एतेन दीर्घह्रस्वत्वे व्याख्याते ॥१७॥ अनित्येऽनित्यं ॥१८॥ नित्ये नित्यं ॥१९॥
नित्यंपरिमंडलं ॥२०॥ अविद्या च विद्यालिंगं ॥२१॥ विभवान्महानाकाशस्तथा चात्मा ॥२२॥ तदभावादणुम
नः ॥२३॥ गुणैर्दिग्व्याख्याता ॥२४॥ कारणे कालः ॥२५॥ ॥इति काणादे सप्तमे प्रथममाह्निकं॥ ॥रूपरस
गंधस्पर्शव्यतिरेकादर्थांतरमेकत्वं ॥१॥ तथा पृथक्त्वं ॥२॥ एकत्वैकपृथक्त्वयोरेकत्वैकपृथक्त्वाभावोऽणुत्वमहत्वाभ्यां वै
व्याख्यातः ॥३॥ निःसंख्यत्वात्कर्मगुणानां सर्वैकत्वं न विद्यते ॥४॥ भ्रांतं तत् ॥५॥ एकत्वाभावाद्भक्तिस्तु न

विद्यते ॥६॥ कार्यकारणयोरेकत्वैकपृथक्त्वाभावादेकत्वैकपृथक्त्वे न विद्यते ॥७॥ एतदनित्ययोर्व्याख्यातं ॥८॥
ज अन्यतरकर्मज उभयकर्मजः संयोगजश्च संयोगः ॥९॥ एतेन विभागो व्याख्यातः ॥१०॥ संयोगविभा
गयोः संयोगविभागाभावोऽणुमहत्वाभ्यां व्याख्यातः ॥११॥ कर्मभिः कर्माणि गुणैर्गुणाः ॥१२॥ युतसिध्य
भावात्कार्यकारणयोः संयोगविभागौ न विद्येते ॥१३॥ गुणत्वात् ॥१४॥ गुणोऽपि विभाव्यते ॥१५॥ निष्क्रि
यत्वात् ॥१६॥ असति नास्तीति प्रयोगात् ॥१७॥ शब्दार्थावसंबंधौ ॥१८॥ संयोगिनो दंडात्समवायिनो वि
शेषाच्च ॥१९॥ सामयिकः शब्दादर्थप्रत्ययः ॥२०॥ एकदिक्काभ्यां संनिकृष्टविप्रकृष्टाभ्यां परमपरं च ॥२१॥ ९
कारणपरत्वात्कारणापरत्वाच्च ॥२२॥ परत्वापरत्वयोः परत्वापरत्वाभावोऽणुत्वमहत्वाभ्यां व्याख्यातः क
र्मभिः कर्माणि गुणैर्गुणाः ॥२३॥ इहेदमिति यतः कार्यकारणयोः स समवायः ॥२४॥ द्रव्यत्वगुणत्वप्रति
षेधो भावेन व्याख्यातः ॥२५॥ तत्वं भावेन ॥२६॥ लिंगविशेषाद्विशेषलिंगाभावाच्च ॥२७॥ इति काणादे

काणादसूत्रं सप्तमाध्याये द्वितीयमाह्निकं॥ ॥सप्तमोध्यायः॥ ॥द्रव्येषु ज्ञानं व्याख्यातं।१।तत्रात्मा मनश्चाप्रत्यक्षे।२।
ज्ञाननिर्देशे ज्ञाननिष्पत्तिविधिरुक्तः।३।गुणकर्मसु संनिकृष्टेषु ज्ञाननिष्पत्तेर्द्रव्यं कारणं।४।सा
मान्यविशेषेषु सामान्यविशेषाभावात्तत एव ज्ञानं।५।सामान्यविशेषापेक्षं द्रव्यगुणकर्मसु।६। ८
द्रव्ये द्रव्यगुणकर्मापेक्षं।७।गुणकर्मसु गुणकर्माभावाद्गुणकर्मापेक्षं न विद्यते।८।समवायिनः श्वै
दु त्याच्छ्वैत्यबुद्धेश्च श्वेते बुद्धिस्ते एते कार्यकारणभूते।९।द्रव्येष्वनितरेतरकारणाः॥१०॥कारणायौ
गपद्यात्कारणक्रमाच्च घटपटादिबुद्धीनां क्रमो न हेतुफलभावात्॥११॥ ॥इति काणादे अष्टमस्य प्र
थमाह्निकं॥ ॥अयमेष त्वया कृतं भोजयैनमिति बुध्यपेक्षं।१।दृष्टाभावाददृष्टेषु भावात्।२।अ
र्थ इति द्रव्यगुणकर्मसु।३।द्रव्येषु पंचात्मकत्वं।४।भूयस्त्वाच्च पृथिवी गंधज्ञाने प्रकृतिः।५।तथापस्ते
जोवायुश्च रसरूपस्पर्शविशेषात्॥६॥ ॥इति काणादसूत्रेष्टमस्य द्वितीयमाह्निकं॥ ॥अष्टमोध्यायः॥

प्रागसत्।१। असतः क्रिया

क्रियागुणव्यपदेशाभावात्प्रागसत्।१।असतः क्रियागुणव्यपदेशाभावादर्थांतरं॥२॥सच्चासत्।३।
स यच्चान्यदसदतस्तदसत्।४।असदिति भूतप्रत्यक्षाभावाद्भूतस्मृतेर्विरोधिप्रत्यक्षवत्।५।तथाभा
वे भावप्रत्यक्षत्वाच्च।६।एतेनाघटोऽगौरधर्मश्च व्याख्याताः।७।अभूतं नास्तीत्यनर्थांतरं।८।नास्ति व
घटो गेह इति सतो घटस्य गेहसंसर्गप्रतिषेधः।९॥आत्मन्यात्ममनसोः संयोगविशेषादात्मप्रत्यक्षं॥१०॥
तथा द्रव्यांतरेषु॥११॥असमाहितांतःकरणा उपसंहृतसमाधयस्तेषां॥१२॥तत्समवायात्कर्मगुणेषु॥१३॥
आत्मसमवायादात्मगुणेषु॥१४॥ ॥इति काणादे नवमाध्यायस्याद्यमाह्निकं॥ ॥अस्येदं कार्य
कारणं संयोगि विरोधि समवायि चेति लैंगिकं॥१॥अस्येदं कार्यकारणसंबंधश्चावयवाद्भवति॥२॥एते
न शाब्दं व्याख्यातं।३।हेतुरपदेशो लिंगं प्रमाणं करणमित्यनर्थांतरं।४।अस्येदमिति बुध्यपेक्षितत्वात्॥५॥आ
त्ममनसोः संयोगविशेषात्संस्काराच्च स्मृतिः।६।तथा स्वप्नः।७।स्वप्नांतिकं॥८॥धर्माच्च।९।इंद्रियदोषा

वैशेषिकसूत्रं

संस्कारदोषाच्चाविद्या ।१०। तद्दुष्टं ज्ञानं ॥११। अदुष्टं विद्या ।१२। आर्षं सिद्धदर्शनं च धर्मेभ्यः ॥१३॥ ॥
इति कणादसूत्रे नवमाध्यायस्य द्वितीयमाह्निकं ॥ ॥नवमोऽध्यायः॥ ॥इष्टानिष्टकारणविशेषाद्वि
रोधाच्च मिथः सुखदुःखयोरर्थान्तरभावः ।१॥ संशयनिर्णयान्तराभावश्च ज्ञानान्तरत्वे हेतुः ॥२॥ तयो
र्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्यां ।३। अभूदित्यपि ।४। सति च कार्यादर्शनात् ॥५॥ एककार्यसमवायि कारणं
तेषु दृष्टत्वात् ॥६॥ एकदेश इत्येकस्मिन् शिरः पृष्ठमुदरं मर्माणि तद्विशेषस्तद्विशेषेभ्यः ॥७॥ ॥
इति कणादे दशमाध्यायस्य प्रथममाह्निकं ॥ ॥कारणमिति द्रव्ये कार्यसमवायात् ॥१॥ कारणेसम
वायात् ।२। तथा रूपे कारणैकार्थसमवायाच्च ।३। कारणासमवायात् संयोगः पटस्य ।४॥ कारणकारणस
मवायाच्च ।५। संयुक्तसमवायादग्नेर्वैशेषिकं ।६। दृष्टानां दृष्टप्रयोजनानां दृष्टाभावे प्रयोगोऽभ्युदया
य ॥७। तद्वचनादाम्नायप्रामाण्यमिति ॥८॥ ॥इति कणादसूत्रे दशमाध्यायस्य द्वितीयमाह्निकं ॥ ॥दशमोऽध्यायः॥